# Natya Shastra Chapter 37

# નાટ્યશાસ્ત્રમ્ અધ્યાયઃ ૩૭

## Document Information

Text title : naaTyashaastra adhyaaya 37

File name : natya37.itx

Category : nATyashAstra, major_works, bharata

Location : doc_z_misc_major_works

Author : Sage Bharata

Transliterated by : hareshbakshi at hotmail.com

Proofread by : hareshbakshi at hotmail.com

Latest update : february 20, 2003

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# નાટ્યશાસ્ત્રમ્ અધ્યાયઃ ૩૭

॥ શ્રીરસ્તુ ॥

ભરતમુનિપ્રણીતં નાટ્યશાસ્ત્રમ્

અથ સપ્તત્રિંશોઽધ્યાયઃ ।

કસ્યચિત્ત્વથ કાલસ્ય નહુષો નામ પાર્થિવઃ ।
પ્રાપ્તવાન્ દેવરાજ્યં હિ નયબુદ્ધિપરાક્રમઃ ॥ ૧ ॥

પ્રશશાસ તદા રાજ્યં દેવૈર્વ્યુષ્ટિમવાપ્નુવન્ ।
ગાન્ધર્વં ચૈઅ નાટ્યં ચ દૃષ્ટ્વા ચિન્તામુપાગમત્ ॥ ૨ ॥

સ ચિન્તયિત્વા મનસા કથમેષ ગૃહે મમ ।
નાટ્યપ્રયોગો હિ ભવેદિતિ સાદર એવ સન્ ॥ ૩ ॥

કૃતાઞ્જલિઃ પ્રયોગાર્થં પ્રોક્તવાંસ્તુ સુરાન્ નૃપઃ ।
અપ્સરોભિરિદં સાર્ધં નાટ્યં ભવતુ મે ગૃહે ॥ ૪ ॥

પ્રત્યુક્તશ્ચ તતો દેવૈર્બૃહસ્પતિપુરોગમૈઃ ।
દિવ્યાઙ્ગનાનાં નૈવેહ માનુષૈઃ સહ સઙ્ગતિઃ ॥ ૫ ॥

હિતં પથ્યં ચ વક્તવ્યો ભવાન્ સ્વર્ગાધિપો હિ યત્ ।
આચાર્યાસ્તત્ર ગચ્છન્તુ ગત્વા કુર્વન્તુ તે પ્રિયમ્ ॥ ૬ ॥

પ્રોક્તવાંસ્તુ તતો માં તુ નૃપતિઃ સ કૃતાઞ્જલિઃ ।
ઇદમિચ્છામિ ભગવન્ નાટ્યમુર્વ્યાં પ્રતિષ્ઠિતમ્ ॥ ૭ ॥

પૂર્વમાચાર્યકં ચૈવ ભવતાઽભિહિતં શ્રુતમ્ ।
વ્યક્તભાવાત્વિદં લબ્ધં ત્વત્સકાશાદ્ દ્વિજોત્તમ ॥ ૮ ॥

પિતામહગૃહેઽસ્માકં તદન્તઃપુરે જને ।
પિતામહક્રિયાયુક્ત મુર્વશ્યાં સમ્પ્રવર્તિતમ્ ॥ ૯ ॥

તસ્યાઃ પ્રણાશશોકેન ઉન્માદોપરતે નૃપે ।

વિપન્નેઽન્તઃપુરજને પુનર્નાશમુપાગતમ્ ॥ ૧૦ ॥

પ્રકાશમેતદિચ્છામો ભૂયસ્તત્ સમ્પ્રયોજિતમ્ ।
તિથિયજ્ઞક્રિયાસ્વેતદ્ યથા સ્યાન્ મઙ્ગલૈઃ શુભૈઃ ॥ ૧૧ ॥

તસ્મિન્ મમ ગૃહે બદ્ધં નાનાપ્રકૃતિસંશ્રયમ્ ।
સ્ત્રીણાં લલિતવિન્યાસૈર્યતો નઃ પ્રથયિષ્યતિ ॥ ૧૨ ॥

તથાઽસ્ત્વિતિ મયા પ્રોક્તો નહુષઃ પાર્થિવસ્તદા ।
સુતાશ્ચાહૂય સમ્પ્રોક્તા સામપૂર્વં સુરૈઃ સહ ॥ ૧૩ ॥

અયં હિ નહુષો રાજા યાચતે નઃ કૃતાઞ્જલિઃ ।
ગમ્યતાં સહિતૈર્ભૂમિં પ્રયોક્તું નાટ્યમેવ ચ ॥ ૧૪ ॥

કરિષ્યમશ્ચ શાપાન્તમસ્મિન્ સમ્યક્ પ્રયોજિતે ।
બ્રાહ્મણાનાં નૃપાણાં ચ ભવિષ્યથ ન કુત્સિતાઃ ॥ ૧૫ ॥

તત્ર ગત્વા પ્રયુજ્યન્તાં પ્રયોગાન્ વસુધાતલે ।
ન શક્યં ચાન્યથા કર્તું વચનં પાર્થિવસ્ય હિ ॥ ૧૬ ॥

અસ્માકં ચૈવ સર્વેષાં નહુષસ્ય મહાત્મનઃ ।
આત્મોપદેશસિદ્ધં હિ નાટ્યં પ્રોક્તં સ્વયંભુવા ॥ ૧૭ ॥

શેષમુત્તરતન્ત્રેણ કોહલસ્તુ કરિષ્યતિ ।
પ્રયોગઃ કારિકાશ્ચૈવ નિરુક્તાનિ તથૈવ ચ ॥ ૧૮ ॥

અપ્સરોભિરિદં સાર્ધં ક્રીડનીયકહેતુકમ્ ।
અધિષ્ઠિતં મયા સ્વર્ગે સ્વાતિના નારદેન ચ ॥ ૧૯ ॥

તતશ્ચ વસુધાં ગત્વા નહુષસ્ય ગૃહે દ્વિજાઃ ।
સ્ત્રીણાં પ્રયોગં બહુધા બદ્ધવન્તો યથાક્રમમ્ ॥ ૨૦ ॥

અત્રોપભોગતસ્તે તુ માનુષીષુ મામાત્મજાઃ ।
બદ્ધવન્તોઽધિકસ્નેહં તાસુ તદ્ દ્વિજસત્તમાઃ ॥ ૨૧ ॥

પુત્રાનુત્પાદ્ય વધ્વા ચ પ્રયોગં ચ યથાક્રમમ્ ।
બ્રહ્મણા સમનુજ્ઞાતાઃ પ્રાપ્તાઃ સ્વર્ગં પુનઃ સુતાઃ ॥ ૨૨ ॥

એવમુર્વીતલે નાટ્યં શિષ્યૈઃ સમવતારિતમ્ ।
ભરતાનાં ચ વંશોઽયં ભવિષ્યં ચ પ્રવર્તિતઃ ॥ ૨૩ ॥

કોહલાદિભિરેવં તુ વત્સશાણ્ડિલ્યધૂર્તિતૈઃ ।
મત્યધર્મક્રિયાયુક્તૈઃ કશ્ચિત્કાલમવસ્થિતૈઃ ॥ ૨૪ ॥

એતચ્છાત્રં પ્રણીતં હિ નારાણાં બુદ્ધિવર્ધનમ્ ।
ત્રૈલોક્યસ્ય ક્રિયોપેતં સર્વશાસ્ત્રનિદર્શનમ્ ।
મઙ્ગલ્યં લલિતં ચૈવ બ્રહ્મણો વદનોદ્ભવમ્ ॥ ૨૫ ॥

ય ઇદં શ્રુણુયાન્ નિત્યં પ્રોક્તં ચેદં સ્વયમ્ભુવા ।
કુર્યાત્ પ્રયોગં યશ્ચૈવમથવાઽધીતવાન્ નરઃ ॥ ૨૬ ॥

યા ગતિર્વેદવિદુષાં યા ગતિર્યજ્ઞકારિણામ્ ।
યા ગતિર્દાનશીલાનાં તાં ગતિં પ્રાપ્નુયાદ્ધિ સઃ ॥ ૨૭ ॥

દાનધર્મેષુ સર્વેષુ કીર્ત્યતે તુ મહત્ ફલમ્ ।
પ્રેક્ષણીયપ્રદાનં હિ સર્વદાનેષુ શસ્યતે ॥ ૨૮ ॥

ન તથા ગન્ધમાલ્યેન દેવાસ્તુષ્યન્તિ પૂજિતાઃ ।
યથા નાટ્યપ્રયોગસ્થૈર્નિત્યં તુષ્યન્તિ મઙ્ગલૈઃ ॥ ૨૯ ॥

ગાન્ધર્વં ચેહ નાટ્યં ચ યઃ સમ્યક્ પરિપાલયેત્ ।
સ ઈશ્વરગણેશાનાં લભતે સદ્ગતિં પરામ્ ॥ ૩૦ ॥

એવં નાટ્યપ્રયોગે બહુવિધિવિહિતં કર્મશાસ્ત્રં પ્રણીતમ્ ।
નોક્તં યચ્ચાત્ર લોકાદનુકૃતિકરણાત્ ।
સંવિભાવ્યં તુ તજ્જ્ઞૈઃ ॥

કિં ચાન્યત્ સમ્પ્રપૂર્ણા ભવતુ વસુમતી નષ્ટદુર્ભિક્ષરોગા ।
શાન્તિર્ગોબ્રાહ્મણાનાં ભવતુ નરપતિઃ પાતુ પૃથ્વીં સમગ્રામ્ ॥ ૩૧ ॥

ઇતિ ભરતીયે નાટ્યશાસ્ત્રે ગુહ્યતત્ત્વકથનાધ્યાયઃ સપ્તત્રિંશઃ ॥ ૩૭॥

॥ નાટ્યશાસ્ત્રં સમ્પૂર્ણમ્ ॥

Encoded by Haresh BakShi hareshbakShi@hotmail.com

*Natya Shastra Chapter 37*

pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*